श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्वेङ्कटाध्वरि विरचितम्

# ॥ श्रीलक्ष्मीसहस्रम् ॥

## ॥ परिसङ्ख्यास्तबकः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ परिसङ्ख्यास्तबकः ॥

वन्दारुरक्षणे दक्षां वन्दे गोविन्दसुन्दरीम्।
यत्प्रसादादृते देवाः सर्वे रक्षितुमक्षमाः॥ १ ॥

अम्ब त्वया हन्त शरीरभाजामरक्षितानामपि रक्षितानाम्।
देवा मुदे वा पुनरापदे वा भवन्ति किं ते बकवैरिकान्ते॥ २ ॥

शीतस्वभावां भवतीं श्रितेभ्यो दिव्यां समृद्धिं ददतीमतीत्य।
उपाश्रितध्वंसकमुष्णमग्निमुपासते के जगदम्ब लोके॥ ३ ॥

अज्ञाततृप्तिमिमिते विभवेऽपि दीन-
बन्धुं विहाय भवतीं भवतोऽप्यवन्तीम्।
सख्युः शुचेरपि समाप्तिदमम्ब कार्श्ये
कस्तं प्रभञ्जनमिहार्चतु गन्धवाहम्॥ ४ ॥

यमविषयगतिः स्याद्यद्गृहीतस्य जन्तोः
अमतिरमुमुपास्तामप्रभुं पाशहस्तम्।
जननि परिगृहीतत्राणजातादरां त्वाम्
अहमखिलनियन्त्रीमब्जहस्ताम् प्रपद्ये॥ ५ ॥

कुर्वाणं परुषैः करैः कुवलयक्लेशं भृशं सद्गुण-
श्रीहार्यभ्युदयं तमम्ब तपनं केचिन्नमस्कुर्वताम्।
विश्वानन्दकरीं वयं तु विदुषां विश्वाधिकां संपदं
तन्वानां प्रणमेम तत्रभवतीं तापत्रयध्वंसिनीम्॥ ६ ॥

हरिसखि शतमन्युं वायसस्य स्वसूनोः
अपि विपदपनीतावक्षमं नो यजेय।
अहमविदितमन्युं हन्त तस्य स्वशात्रोः
अपि परिहृतभीतिं त्वां शुभामाश्रयेयम्॥ ७ ॥

प्रौढैश्वर्यजुषोऽपि यस्य सुहृदा भिक्षाशिता नोज्झिता
 यत्र श्रीदपदं वदन्ति विबुधा रूढ्याश्वकर्णादिवत्।
यक्षं तं यजतामधीर्वयममी त्वामिष्टदात्रीं स्तुमो
 मातर्लक्ष्मि महाविभूतिरनघो यस्याः सखा ते हरिः॥ ८॥

प्रौढिर्यस्य हि पूर्वपक्षविदिता यो लुब्धचूडामणिः
 यश्चाहीनमुखेन दूषितकलस्तं कः कलङ्काश्रयम्।
अञ्चेत्सोममपामरः श्रुतिशिरः सिद्धान्तसिद्धोन्नतिं
 पद्मे काङ्क्षितदां बुधस्तुतकलां त्वां निष्कलङ्कां विना॥ ९॥

पद्मे येषामुच्चभावो न नित्यो ये सर्वेऽपि स्थानभेदेन तीक्ष्णाः।
यष्टुं तुष्टिर्न ग्रहांस्तानतस्त्वां नित्यौन्नत्यां नौमि सर्वत्र मृद्वीम्॥ १०॥

शाखावृन्दप्रथितविभवां सत्सुपर्णाधिरोहां
 त्वामस्तुत्वा जलनिधिभुवं कल्पवल्लीमतल्लीम्।
आकाङ्क्षन्तः फलमविकलं देव्यपर्णोद्भवं के
 संसेवेरन् शरवणभवं स्थाणुजातं विशाखम्॥ ११॥

त्वां कृतश्रुतिपथप्रवर्तनां सज्जनादरकृताननां विना।
निर्मितश्रुतिविकम्पनं रमे साधुवारणमुखं श्रयेत कः॥ १२॥

दुर्गां परे गाढभवानुषङ्गा शिलोच्चयादभ्युदितां श्रयन्ताम्।
भक्त्यैकलभ्यां भवसिन्धुनावं सुधाब्धिजे त्वां वयमाश्रयामः॥ १३॥

स्थानं यस्य श्मशानं सततमनुचरो भूतवेतालवर्गः
 चेलं चर्म स्रगस्थ्नां ततिरहह तमप्युग्रमेके भजन्ताम्।
पद्मे पद्मे स्थितां त्वां सततमनुसृतां देवतायौवतेन
 ध्यायेम क्षौमभाजं वयमनुदिनमामुक्तमुक्ताकलापाम्॥ १४॥

नाभिजातमधरीकृतहंसं जन्तवः कतिपये कलयन्ताम्।
सेवते जगति हंसगतिं त्वां सिन्धुनन्दिनि सुधीरभिजाताम्॥ १५॥

चित्तवृत्तिरिह कञ्जमन्दिरे धुन्वतीं दुरितपुञ्जमिन्दिरे।
सिद्धये जननि सेवतान्तरां त्वामनाकलितदेवतान्तराम्॥ १६॥

यद्यादधासि करुणां यदि वा न पद्मे
    किं दैवतैस्त्वदितरैरपवर्गलिप्सोः।
तुष्टो यदि क्षितिपतिर्यदि वा न तुष्टः
    किं नाम शौरिसखि पारिषदैर्विवित्सोः॥ १७॥

दृष्टादृष्टेप्सितपुषि भवत्पादपद्मावलम्बे
    दिष्ट्या लब्धे क इह भजतां देवतां भूष्णुरन्याम्।
दृष्टे स्पष्टं ननु दिनकरे दृश्यसन्दर्शनार्थं
    दीपारोपव्यसनमजडो देवि कः स्वीकरोति॥ १८॥

त्वयि जननि जयन्त्यां शाश्वतैश्वर्यदात्र्यां
    परिमितफलदात्रीर्देवताः सेवतां कः।
फलभरनतसस्यां प्राप्य चोलक्षितिं किं
    प्रकटमटति विन्ध्यप्रान्तभूमीरमूढः॥ १९॥

तव जलनिधिकन्ये दैवतैः पामरोऽन्यैः
    कलयतु समतामप्यन्ततः किं ततस्ते।
दरमपि गरिमाणं दर्दुरोऽकर्दमाया
    विबुधपुरतटिन्या वेत्ति किं पल्वलेभ्यः॥ २०॥

विष्णोः पत्नि भवत्प्रसादविरहव्यावर्त्यमानश्रियां
    संपत्तिष्ठति सा न दीर्घमुदिता या क्षुद्रदेवार्चनैः।
अन्नालाभत एव शुष्कवपुषां कुक्षौ पुनः पीनता
    कष्टं श्वासनिरोधनैरुपनता कालं कियन्तं वसेत्॥ २१॥

कल्याणं भवती करोति भजतामेकापि लोकाम्ब यत्
    संभूयापि च देवतान्तरशतैर्नैतद्विधातुं क्षमम्।
राकाचन्द्रिकया कयापि सुकरं विश्वप्रजाह्लादनं
    नैकाभिर्ननु तारकाभिरपि वा नो शक्यनिष्पादनम्॥ २२॥

ननु तव पदाम्भोजद्वन्द्वे निविष्टमना मना-
    गपि वितनुते देवेष्वन्येषु मेदुरमादरम्।

ललितमृदुलेलब्धास्वादो रसालकपल्लवे
　　स्पृहयति पिकः कञ्जावासे करीरदलानि किम्॥ २३ ॥

मातः पद्मे मृत्युमत्येतुकामो
　　मुक्त्वा कस्त्वां मानयेत् क्षुद्रदेवान्।
प्रौढां नावं प्राप्य सिन्धुं तरिष्य-
　　न्काशस्तम्बालम्बनं कश्चिकीर्षेत्॥ २४ ॥

संदत्ते सकृदर्चितापि भवती साम्राज्यमत्यूर्जितं
　　त्वद्भिन्नैस्तु किमस्ति देवि बहुधाप्यासेवितैर्दैवतैः।
सत्सिद्धिं सकृदीक्षितोऽपि दिशति श्रीरामसेतुर्नृणाम्
　　अर्थः कोऽस्ति तटाकसेतुशतकैरश्रान्तदृष्टैरपि॥ २५ ॥

देवि त्वत्पदपद्मवन्दनधना दुर्दैवतोपासना-
　　ल्लब्धं मुग्धवधूकटाक्षतरलं नैवाद्रियन्ते धनम्।
वेधा विष्टपचित्तसृष्टिपटुधीरर्थक्रियादूरगं
　　व्यामोहावहमैन्द्रजालिकजगच्चित्रं किमु श्लाघते॥ २६ ॥

सत्यप्यागसि संश्रितान् करुणया संरक्षसि त्वं रमे
　　क्षोदिष्ठादपराधतोऽपि भजके कुप्यन्ति देवाः परे।
छेत्तॄणामपि तापमम्ब हरते शाखी निजच्छायया
　　गाढस्पर्शत एव पोषकमपि घ्नन्ति क्रुधा पन्नगाः॥ २७ ॥

सुभूयानायासः फलमगुरु दुर्दैवतजुषां
　　प्रयासः क्षोदीयान् फलमतिमहत् त्वां तु भजताम्।
लघिष्ठो लाभः स्याल्लवणवणिजां श्रान्तिरधिका
　　फलत्यल्पो यत्नः फलमलघु कर्पूरवणिजाम्॥ २८ ॥

स्थास्नुः श्रेयः स भजति रमे यः पदं त्वत्कृपाया
　　बाधोदर्कं विभवमुपयात्यन्यदेवोपसेवी।
दृष्टान्तोऽन्त्ये गिरिशभजनप्राप्तभूतिर्दशास्यः
　　तद्भ्राताद्ये तव करुणया लब्धनिष्कम्पसम्पत्॥ २९ ॥

त्वां मातरुपासीना न देवतान्तरमुपासते सन्तः।
लब्धे निधौ निरवधौ कदर्यसेवाव्यथां सहन्ते के॥ ३० ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे परिसङ्ख्यास्तबकः ॥